"प्रयोगं कुर्वते ये तु हेमधान्यरसादिना। समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः। समो न्यूनोऽधिको वांशो येन क्षिप्तस्तथैव सः। व्ययं दद्यात् कर्म कुर्य्याल्लाभं गृह्णीत चैव हि" इति। यत्र पुनरस्य द्वौ भागौ अस्यैक इति संवित् कृता तत्र तदनुरोधेन व्ययलाभौ प्रकल्प्याविल्याह याज्ञवल्क्यः "समवायेन वणिजां लाभार्थं कर्म कुर्वताम्। लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ" इति। सम्भूयकारिणां कर्त्तव्यमाह व्यासः "समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम्। नानापण्यानुसारास्ते प्रकुर्युः क्रयविक्रयौ। अगोपयन्तो भाण्डानि दद्युः शुल्कञ्च तेऽध्वनि। अन्यथा द्विगुणं दाप्याः शुल्कस्थानाद्बहिःस्थिताः" इति। नारदोऽपि "भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणम्। कुर्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः" इति। अथ वा सर्वानुज्ञया सर्वेषां कार्य्यमेक एव कुर्य्यात्। अतएव बृहस्पतिः "बहूनां सम्मतो यस्तु दद्यादेको धनं नरः। करणं कारयेद्वापि सर्वैरेव कृतं भवेत्" इति। करणं लेख्यादिकम्। सम्भूयकारिणामन्योन्यविवादे निर्णयप्रकारमाह स एव "परीक्षकाः साक्षिणश्च त एवोक्ताः परस्परम्। सन्दिग्धेऽर्थे वञ्चनाया न चेद्विद्वेषसंयुताः" इति। यदा तु विद्वेषसंयुक्तास्तदाप्याह स एव "यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये। शपथैः सोऽपि शोध्यः स्यात् सर्ववादेष्वयं विधिः" इति। सर्ववादेऽपि वञ्चनरहितवादेऽपि। वञ्चकत्वे सिद्धे सति किं कार्य्यमित्यपेक्षिते आह याज्ञवल्क्यः "जिह्मं त्यजेयुर्निर्लाभम्" इति। जिह्मं वञ्चकं निर्लाभं कृत्वा त्यजेयुर्बहिः कुर्युरितरे सम्भूयकारिण इत्यर्थः। सम्भूयकारिष्वसमर्थं प्रत्याह स एव "अशक्तोऽन्येन कारयेत्" इति। स्वांशानुरूपं कर्म्मेति शेषः। दैवराजकृतद्रव्यहानिविषये सर्वान् प्रत्याह बृहस्पतिः "द्रव्यहानिर्यदा तत्र दैवराजकृता भवेत्। सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः" इति। सम्भूयकारिभिः सर्वैरिति शेषः। क्षयहानिरिति पाठे क्षयाख्यैव हानिः क्षयहानिरुपचय्यार्थव्यतिरिक्ता हानिरित्यर्थः। प्रातिस्विकदोषेण द्रव्यनाशे स एवाह "अनिर्दिष्टो वार्य्यमाणः प्रमादाद्यस्तु नाशयेत्। तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम्" इति। अनिर्दिष्टः समवाय्यननुज्ञातः। याज्ञवल्क्योऽपि "प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम्। स तद्दद्यात्"। पालने त्वाह स एव "विप्लवाद्रक्षिताद्दशमांशभाक्" इति। बृहस्पतिरपि "दैवराजभयाद्यस्तु स्वशक्त्या परिपालयेत्। तस्यांशं दशमं दत्त्वा गृह्णीयुस्तेंऽशतोऽपरम्" इति। तस्य तस्मै दशमंशन्ते समवायिद्रव्यमिति शेषः। प्रतिपालयेत् समाहरेत् स्वशक्त्या प्रत्याहरेदित्यर्थः। नारदोऽपि "दैवतस्कररराजाग्निव्यसने समुपस्थिते। यस्तत् स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः" इति। यस्तु समवायिद्रव्यं समवायिभिः सह प्रतियाचनादिना न साधयति तस्य लाभहानिरित्याह बृहस्पतिः "समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्। न याचते च यः कश्चिल्लाभात् स परिहीयते" इति। "याचनग्रहणं येन यत्कर्म स्वांशानुरूपं कर्त्तव्यं तस्याप्युपलक्षणार्थं तेन तत्कर्माकरणेऽपि लाभहानिरित्यस्मादेव वचनात् प्रतिपत्तव्यमिति" स्मृतिचन्द्रिकायाम्। सम्भूयकारिणामृत्विजां कर्त्तव्यमाह मनुः "ऋत्विजः समवेतास्तु यत्र सत्रे निमन्त्रिताः। कुर्युर्यथार्हं तत्कर्म गृह्णीयुर्दक्षिणां तथा" इति। अत्र सत्रशब्दो यज्ञमात्रविवक्षया प्रयुक्तो न पुनर्बहुयजमानकसत्राख्ययज्ञविशेषविवक्षया। तत्र यजमानानामेवाध्वर्य्यवादिकर्मकारित्वे दक्षिणाभागिनामृत्विजामभावात्। तथा कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः। तथा च स एव "सम्भूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः। अनेन कर्मयोगेन कर्त्तव्यांशप्रकल्पना" इति। स्वानि कर्माणि याजमानव्यतिरिक्तानीति शेषः। इयं चांशकल्पना द्वादशशतं गावो दक्षिणेत्येवं क्रतुसम्बन्धित्वेन विधीयमानायां दक्षिणायामेव न ऋत्विग्विशेषोद्देशेन विहितायास्तद्विधायकश्रुतिविरोधापत्तेः अतएवाहर्मनुबृहस्पती "रथं हरेद् तथाध्वर्युर्ब्रह्माधाने च वाजिनम्। होता निविहरं चाश्वमुद्गाता चाप्यनः क्रये" इति। निविहरं निविच्छुंसनलक्षं वरम्। उद्गातृशब्देनोद्गातृगणमध्यस्थः सुब्रह्मण्यो गृह्यत इति मदनरत्ने। अनः शकटस्य क्रये सोमक्रये। दक्षिणांशकल्पनायाः प्रकारमाहतुः मनुबृहस्पती "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" इति। सर्वेषां षोडशानामृत्विजां मध्ये ये मुख्या गणस्थायाः होतृब्रह्माध्वर्यूद्गातारस्तेऽर्द्धिनः उक्तदक्षिणायाः किञ्चिन्न्यूनमर्द्धं ४८ गृह्णीयुः समग्रार्द्धग्रहणे वक्ष्यमाणविभागकल्पनाविरोधः स्यात्। अपरे द्वितीया